# Rajakrita Shankarat Varayachana

# राजाकृता शङ्करात् वरयाचना

## Document Information

Text title : Rajakrita Shankarat Varayachana

File name : rAjAkRRitAshankarAtvarayAchanA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 21| 210-257||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# राजाकृता शङ्करात् वरयाचना

(शिवरहस्यान्तर्गते उग्राख्ये)
आदिविष्णुर्भवान्पूर्वं यस्माज्जातो महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २१०॥

यतश्चतुर्मुखो जातो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २११॥

यस्मादिन्द्रादयो जाता दिक्पालाः श्रीमहेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २१२॥

वेदा यस्मात्समुत्पन्ना देवदेवान्महेश्वरात् ।
(यस्य निःश्वसितं वेदा देवदेवस्य शूलिनः ।)
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २१३॥

यस्मात्सूर्यः समुत्पन्नो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २१४॥

यस्माच्चन्द्रः समुत्पन्नो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २१५॥

यस्मादजायताकाशो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २१६॥

यस्माद्वायुः समुत्पन्नो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २१७॥

यस्मादग्निः समुत्पन्नो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २१८॥

यस्मादापः समुत्पन्ना देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २१९॥

यस्मात्क्षोणी समुत्पन्ना देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २२० ॥

यस्मादेषधयो जाता देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २२१ ॥

यस्मादन्नं समुत्पन्नं देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २२२ ॥

यस्माद्वीपाः समुत्पन्ना देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २२३ ॥

यस्माद्विपादः सम्भूता देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २२४ ॥

यस्माच्चतुष्पदा जाता देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २२५ ॥

यस्मादष्टपदा जाता देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २२६ ॥

यस्माद्वनानि जातानि देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २२७ ॥

यस्माद्गिरिवरा जाता देवदेवान्महेश्वात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २२८ ॥

यस्यान्तं न विदुर्देवा भवदाद्याः पिनाकिनः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २२९ ॥

यस्य स्वरूपं न ज्ञातं सर्वथा भवदादिभिः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २३० ॥

यत्प्रसादेन विष्णुत्वं त्वया प्राप्तं पुरा हरे ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २३१ ॥

ब्रह्मत्वं ब्रह्मणा प्राप्तं यत्प्रसादात्पुरा हरे ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २३२ ॥

इन्द्रत्वं प्राप्तमिन्द्रेण यत्प्रसादात्पुरा हरे ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २३३ ॥

वात्ययं वायुरनिशं यस्माद्भीतो महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २३४॥

सूर्योऽप्यहरहो नित्यं यस्माद्भीतो महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २३५॥

उदेति वह्निश्चन्द्रश्च यस्माद्भीतो महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २३६॥

यद्भक्तैर्भेदिताः शैला मन्दरप्रमुखाः पुरा ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २३७॥

यद्भक्तैः क्षणमात्रेण समुद्राश्चलुकीकृताः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २३८॥

यद्भक्तैः क्षणमात्रेण लोका व्यत्ययिताः पुरा ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २३९॥

तृणीकृतोऽसि यद्भक्तैस्त्वमेव गरुडध्वज ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २४०॥

तृणीकृतश्चतुर्वक्त्रो यद्भक्तैर्हंसवाहनः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २४१॥

तृणीकृतः शचीनाथो यद्भक्तैः स्वर्गनायकः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २४२॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २४३॥

यदृतं सत्परं ब्रह्म पुरुषं कृष्णम्पिङ्गलम् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २४४॥

यदक्षरं विरूपाक्षमक्षय्यफलदायकम् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २४५॥

यदूर्ध्वरेतमनघं विश्वरूपमनामयम् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २४६॥

यो निर्गुणो निराकारो निरुपाधिर्निरञ्जनः ।

तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २४७॥

यस्सर्ववेदवेदान्तप्रतिपाद्यो महेश्वरः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २४८॥

यः सृजत्यवति स्वैरं हन्ति सर्वमिदं जगत् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २४९॥

त्वया स्वनेत्रपद्मेन पूजितं यत्पदाम्बुजम् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २५०॥

कन्दर्पदर्पं व्यदलद्यः स्वनेत्राग्निना हरः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २५१॥

यो व्यदारयदत्युग्रं नृसिह्मं शरभाकृतिः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २५२॥

कण्ठे दधार यो हालाहलं लोकरिरक्षया ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २५३॥

मधुसूदन यो देवो मधुसूदनसूदनः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २५४॥

यः स्वभक्तैकरक्षार्थं निजघानान्तकं पुरा ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २५५॥

न यस्मात्परमो देवो यो ज्यायानणुरप्युत ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २५६॥

यः सर्वदेवदेवेशो महादेवोऽखिलेश्वरः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ २५७॥

॥ इति शिवरहस्यान्तर्गते राजाकृता शङ्करात् वरयाचना ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २१। २१०-२५७॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 21 . 210-257..

Proofread by Ruma Dewan

*Rajakrita Shankarat Varayachana*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*